International Journal of Sanskrit Research 2019; 5(3): 60-61

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(3): 60-61
© 2019 IJSR
www.anantaajournal.com
Received: 01-03-2019
Accepted: 03-04-2019

**डॉ. बहुरन सिंह पटेल**
सहा.प्रा. शा संस्कृत महा रायपुर, छत्तीसगढ़, भारत

**Correspondence**
**डॉ. बहुरन सिंह पटेल**
सहा.प्रा. शा संस्कृत महा रायपुर, छत्तीसगढ़, भारत

# संस्कृतसाहित्येराष्ट्रियैकता

**डॉ. बहुरन सिंह पटेल**

**प्रस्तावना**

राष्ट्रं नाम राज्धातोः ष्ट्रन् प्रत्ययेन निष्पद्यते। यत्र सभ्यतासंस्कृतिजातिधर्मपन्थावलम्बिनां जनानां सर्वतो–भावेन एकेन नायकेन संरक्षिता अभ्युदयशीलाप्रणाली एवास्ति। सांस्कृतिक–सामाजिक–भाषा–विचार–साहित्य– चैतन्यात्मिका भावप्रधाना एकता राष्ट्रिया एकता कथ्यते। राष्ट्रस्य समुन्नतिर्देशभक्तिपूर्णा धारणैव विद्यते। राष्ट्रस्य समुन्नतिर्देशभक्तिपूर्णा धारणैव विद्यते। विस्तरेणैवं भाषा–साहित्ये आदर्श–रीति–पौराणिक– परम्पराबद्धीभूय आन्तरिकमैक्यमनुभवन् जनसमूहः तत्समूहानां सामूहिको चेतना आध्यात्मिकी सम्पदा मनोवैज्ञा– निकता तन्मध्ये भौगौलिकमैक्यं सुरक्षाभावना विचारसाम्यतादयः राष्ट्रीयैक्यमूलकाः कथ्यन्ते। भारतभूमावस्यां संस्कृति–सभ्यता धर्म–कला–साहित्य–जीवनादर्शान् प्रति मानवमानसे स्वाभाविकः स्वाभिमानः तिष्ठति। सैव राष्ट्रिया एकता कथ्यते। यतो हि–"जननी जनमभूमिश्च सवर्गादपि गरीयसी" इत्येषा भावना राष्टचेतनायाः मूलम्।मातृभूमिं मातृसंस्कृतिं मातृभाषां प्रति समादरमपि राष्ट्रियैक्यमुच्यते।

आब्रह्मदेशकालादत्र सर्वधर्मावलम्बिनो जनाः निवसन्तः सन्ति। अत्रत्यैः ऋषिभिः सर्वजनहिताय सर्वजनसुखाय च स्वदिव्यैः चक्षुर्भिःकालत्रयात्मिकानुभूतिः संसाधिता। सा च पूर्णत्वेन प्रतिफलिता दृश्यन्ते–गायन्ति देवा किल गीतकानि धन्षास्तु ते भारतभूमिभागे।

स्वर्गापवर्गास्पदमार्गभूते भवन्ति भूयः पुरुषाः सुरत्वात् ।। [1]

अस्मिन् भारतराष्ट्रे अज्ञानध्वान्ताक्रान्ताय जगति वेदोद्घोषः समवर्तत। भारतस्योत्कृष्टतमत्वं गौपवमादाय आचार्यमनुना उच्यते–

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।। [2]

इत्थमपरिमितवैभवसमन्वितेयं दैवीवाक् प्राच्यभारते राष्ट्रभाषा पदवीं समाश्रिता आसीत् अस्यां भाषायां राष्ट्रिय– तायाः बहूनि तत्त्वानि विद्यन्ते। वेद–ब्राह्मण–आरण्यक–उपनिषत्–पुराण–रामायण–महाभारत–चरकसंहिता–. निरुक्त–अष्टाध्यायी–महाभाष्य–महाकाव्य–नाटकादिभिः सह ज्ञानविज्ञानयोः भाषा संस्कृतमेव। सम्प्रति विश्वे संस्कृत–चीनी–ग्रीक–लेटिननेतिनाम्न्यःचतस्रः पुरातन्यः भाषाः सन्ति यासु शब्दनिर्माणस्य सामर्थ्यं वर्तते। अत्र संस्कृतस्य सर्वोच्चं स्थानं यतोऽस्यामुपसर्गप्रत्ययादिभिः संयोज्य एकेन मूलधातुना असंख्यशब्दाः निर्मातुं शक्यन्ते। एतेन भाषागतसाहित्ये राष्ट्रैक्यं वरीवर्ति संस्कृतस्य। राष्ट्रीयैकतायाः यावन्ति सूत्राणि तानि सर्वाण्यपि संस्कृतवाङ्मयस्य विभिन्नविधासु समुपलभ्यन्ते। लौकिकप्रवृत्तिषु लोकव्यवहारसौम्मनस्य–बन्धुत्व–सौहार्द– राष्ट्र प्रेम–सद्भावना–परोपकार–कौशल्य–परिवारकल्याण–सहिष्णुता–बन्धुजनसहभागिता–त्याग–शान्तीत्याद्याः गुणाः अस्याः साहित्ये सूत्रत्वेनोच्यन्ते। लोकमूलकाः ते गुणाः लोकःसंसारो वा आधिदैविक–आधिभौतिक–आध्यात्मि– कादि तिसृषु अवधारणासु समाश्रितो विद्यते। दैवमधिकृत्य दैवीशक्त्या कारणात्मिकया प्रकृत्या लोकस्य सत्ता भूतमधिकृत्य भौतिकप्रवृत्या मानवानां तत्समबद्धवस्तूनाञ्च बोधः आत्मानमवलम्ब्य मानवीयस्थावर–जङ्मात्म– कानाञ्च चैतन्यमादयः ज्ञायन्ते। आत्मचेतनया सह समेषां राष्ट्रियाणामेकतारुपा प्रवृत्तिस्तु स्वाभाविकी। पर– ञ्चात्र धर्म–दर्शनोपास्य–भाषा–रीति–नीति–ज्ञान–विज्ञान–कला–जीवनेत्यादिभिस्सह पृथक् पृथगाधारिता राष्ट्रीयैकता विपरिणमते। देशे नैकविधसम्प्रदायधर्मावम्बिनः निवसन्ति। तेषामुपास्यमूलाप्रवृत्तिरपि

भिन्ना–भिन्ना परन्तु वेद–समृति–पुराण–साहित्यपथजुषां राष्ट्रियाणाङ्कृते समानाभ्यवहारधारणां समीहते। वेदेषु यथा–

''इला सरस्वती मही तिस्रो देवीमयो भुवः'' [3]
''ब्राह्मन् ब्रह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर उषष्योऽतिव्याधी महारथो जायताम्'' [4]
''माता भूमिः पुत्रोऽहं पृथिव्याः'' [5]

संस्कृतवाचो द्वितीयप्रस्थानत्वेन पुराणानाङ्क्रम आयाति। तत्र हि पदे–पदे राष्ट्रियमैक्यं समाहितं विभाति–

अत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने।
यतो हि कर्मभूरेषा ततोऽन्या भोगभूमयः।। [6]
"राष्ट्रपीडाकरो राजा नरके वसते चिरम्" [7]
अहो भुवः सप्तसमुद्रवत्याः द्वीपेषु वर्षेष्वधिपुण्यमेतत्।
गायन्ति यत्रत्यजनाः मुरारेः कर्माणि भद्राण्यवतारवन्ति।। [8]

रामायणे राज्याभिषेकस्य वनवासस्य च वृत्तान्तमुपश्रुत्य भगवान् रामो लेशमात्रोऽपि खिन्नो न जायते–

न चास्य महतीं लक्ष्मीः राल्यनाशोपकर्षति।
लोककान्तस्य कान्तत्वाच्छीतरश्मेरिव क्षपा।। [9]
अनिर्वेदः श्रियो मूलमनिर्वेदः परं सुखम्।
अनिर्वेदो हि सततं सर्वार्थेषु प्रवर्तक।।

महाभारतन्तु राष्ट्रियसंस्कृतेर्विश्वकोशः यन्न महाभारते तन्न अन्यत्र इत्युक्ति समारम्भे समेषां राष्ट्रियतत्त्वा– नामुन्मेषोऽत्र द्रष्टव्यः

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्।।
धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः।
तस्माद्धर्मो न हन्तयो मा नो धर्मो हतोऽवधीत।।

संस्कृतसमुपासकानां लेखनीक्रमः शाश्वतीमिमां धारामगेसारयति। मनश्च पौनः पुन्येनाध्ययनाय प्ररयति। मनसि शिवसङ्कल्परुपा कल्याणमयी भावना जागर्ति। स्वातंत्र्यात्प्राक्कालिकं योगीअरविन्दकृतं राष्ट्रभावनापूर्णं भवानी– भारतीनामकं खण्डकाव्यमस्ति यत्र तेजोमयी राष्ट्रहितसाधिका प्रवृत्तिः प्रतिफलति। कविभिरत्र आङ्ग्लशासकानां पराधीनतया सचेतसा जनाः क्रियन्ते। प्रत्येकस्मिन् पद्ये मदन्ते वा "युध्वस्व भो! वञ्चक रक्षधर्मान" "रक्ष स्वजातिं भवार्यः" राष्ट्रैक्यं प्रति सन्नद्धा भवन्तु राष्ट्रं रक्षयन्तु इत्येषा वाणी कवेरत्र दृग्गोचरीभवति। पद्यमेकम्–
उत्तिष्ठ भो जागृहि सर्जयाग्नीन् साक्षाद्धि तेजोऽसि परस्य शौरेः।
वक्षः स्थितेन सनातनेन शत्रून्हुताशनेन दहन्नटस्व।। [10]
अप्पाशास्त्रिमहोदयस्य "पञ्जरबद्धः शुकः" इत्यस्याः कवितायाः अपि उद्भूतं पराधीनतायाः मार्मिकं चित्रएां स्वातंत्र्यात्प्राक्कालिकमेव।

शुक सुवर्णमयस्तव पञ्जरो
न खलु पञ्जर एव विभाव्यताम्।
मुखमिदं ननु हेमशलाकिका–
श्रदनमालि मृतेरतिभीषणम्।। [11]

कविवर्यमथुरानाथदीक्षितेन कृतं भारतविजयनामकं नाटकं यत्र गान्धि–आन्दोलनेन भारतवर्षस्य स्वतंत्रतायाः कल्पना प्रस्तुता विद्यते। पण्डितक्षमारावकृता सत्याग्रहगीतायां स्वाधीनतां प्रति सत्याग्रहस्य स्थितिः स्पष्टां अपि च स्वराज्यविजयेऽस्य वर्णनं प्राप्यते–

स्वातन्त्र्यमाि सम्प्राप्य प्रभविष्यति भारतम्।
प्रौढानां विश्वसंस्थानां स्थापने ख्यापने ध्रुवम्।।
अन्यैर्देशश्च संभूय स्वस्वातन्त्र्यप्रभावातः।
तत्त्द्राट्रियकार्येषु साहाय्यं वितरिष्यति।। [12]

कवेर्हरिदासस्य वङ्गीयप्रतापमिति नाटके भारतीयपराधीनतामपसारणाय कवेर्मनोदशा एवं व्यथां व्युत्पादयति–
विधर्म्यधीना वत भारतप्रजा नदीप्रवाहे पतिता लता यथा।
नैवोन्नतिं गच्छति निष्फलोद्यमा परानुगत्यं हि लघीयसां क्रिया।।
वीरपृथ्वीराजनाटकं कविविश्वेश्वरस्य चाणक्यविजयं भारतविजयमित्यादिनाटकेष्वपि राष्ट्रियमैक्यं प्रामुख्येन ग्रथितं कविभिः। प्रबुद्धहिमाचले वैदेशिकाऽऽक्रमणेन आक्रान्ताः राष्ट्रकन्यका नवयुवकेषु राष्ट्रैक्यस्य संवर्द्धनाय गायन्ति–

वन्दे देशमातरम्

लक्षवीर–जन्मदात्री जगद्धात्री मातरम्।
जय विश्ववन्दिते जय सुखवन्दिते
पुण्यमहिम सुष्मामयी वन्दे शुभां मातरम्।।

इत्थं संस्कृते बहूनि उदाहरणानि दृष्टान्तानि च सन्ति यत्र समग्रराष्ट्रस्य माङ्गल्यपरिणतिर्विलोकयितुं शक्यते।अपि च अत्रत्यनीति–धर्म–विचार–संघादिसरणिरीत्या राष्ट्रैक्यं साधयितुं शक्यते

## संदर्भ


1. ब्रह्मपु 19/25
2. मनुस्मृतिः
3. ऋग्वेद् 1/13/9
4. युजुर्वेद 22/22
5. अथर्व 12/1/12
6. विष्णु 2/3/24
7. अग्नि 223/7
8. श्रीमद्भा 5/6/13
9. रामायण 2/16/58
10. भवानीभारती 18
11. पञ्जरबद्धः शुकः 13
12. स्वराज्यविजयम् पञ्चमाध्यायतः